# संस्कृत-वार्ता:

दिनाङ्क : 09/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेंद्रमोदिना 'परीक्षा पे चर्चा' इति सम्वाद-कार्यक्रमे छात्रैः सह सम्वादः विहितः । तेन छात्राः परीक्षायाः सुदूरं यावत् चिन्तनं विधातुं, जीवनकौशल-क्रीडा-रचनात्मकता-आत्म-विकासादिषु विषयेषु ध्यानं केंद्रितं कर्तुम् अपि प्रेरिताः ।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य सेशेल्स-देशस्य राष्ट्रपतिना सह नवदिल्ल्यां द्वैपाक्षिकी चर्चा कृता। पञ्च-सप्तत्यधिक-एकशतम्-मिलियन-डॉलर-मितस्य विशेष-आर्थिक-साहाय्य-राशेः घोषणया सह सप्तसंधि-पत्रेषु हस्ताक्षराण्यपि जातानि।
- विपक्षस्य कोलाहलकारणात् लोकसभायाः कार्यम् एकदिवसाय स्थगितम्।
- लीबियायाः तटसमीपं नौकायाः जलमग्नेन जाते दुरापन्ने पञ्चपञ्चाशत् संख्याकेषु नौकायात्रिषु दौ बालकौ समेत्य त्रिपञ्चाशत्-प्रवासिनः मारिताः सन्ति
- लक्ष्यभेदन-प्रतियोगितायां, ईशा-सिंहः, मनु-भाकरः, रिदम-सांगवानः च एशियन राइफल/पिस्टल-चैंपियनशिप् इत्यस्यां स्पर्धायां महिलानां पञ्चविंशति-मीटरमितस्य पिस्टल-टीम-इवेंट इत्यस्यस्मिन् स्वर्णपदकं विजितवत्यः ।

---

<u>प्रधानमन्त्री-पीपीसी</u>

प्रधानमन्त्रिणा नरेंद्रमोदिना 'परीक्षा पे चर्चा' इति लोकप्रिय-सम्वाद-कार्यक्रमस्य नवमसंस्करणान्तर्गतं छात्रैः सह सम्वादः विहितः । अद्य प्रकाशिते द्वितीये वीडियो-संस्करणे , प्रधानमन्त्री परीक्षावधौ कथं अशान्तेः चिन्तायाः च मुक्तः भवेत् , इति विषये सम्वादम् अकरोत् सहैव तेन छात्राः परीक्षायाः सुदूरं यावत् चिन्तनं विधातुं, जीवनकौशल-क्रीडा-रचनात्मकता-आत्म-विकासादिषु विषयेषु ध्यानं केंद्रितं कर्तुम् अपि प्रेरिताः ।

वार्ताविधौ , श्रीमोदिना छात्राः स्टार्ट-अप् इति नवाचारैः सह स्वकीयोद्यमितायाः यात्रायाः शुभारम्भाय प्रोत्साहिताः। तेन प्रोक्तं यत् विशालाः विचाराः प्रायशः सूक्ष्मविचारैः एव उत्पद्यन्ते ।

-----------------------------------------------

शिक्षायाः रुचेः च मध्ये संतुलनं स्थापितुं, प्रधानमंत्री अकथयत् यत् छात्राः अध्ययनं रचनात्मक-गतिविधीन् च पृथग्रूपेण न पश्येयुः अपितु द्वे एव समान-रूपेण मूल्यवत्यौ स्तः सहैव ते प्रभावात्मकरूपेण सन्तुलिते कर्तुं शक्येते । श्रीमोदी सबलं प्रोक्तवान् यत् कलात्मकरुचिः रचनात्मकरुचिः च छात्रान् अध्ययनावसादात् क्लान्तात् च निवारयितुं सहाय्यं प्रदातुं शक्येते । प्रधानमंत्रिणा नागरिकाः दायित्वपालनस्य महत्त्वविषये अपि प्रोदीरिताः । सः इतस्ततः अवकरं , मार्गेषु ष्ठीवनं च न कर्तुं सहैव ट्रैफिक-सिग्नल इत्यस्य नियमानाम् अन्येषां आवश्यकनियमानां च पालनं कर्तुं छात्रान् प्रार्थयत् । सः अकथयत् यत् अनुशासित-दैनिक-व्यवहारः राष्ट्रनिर्माणे महत्वपूर्ण-भूमिकां निभालयति ।

श्रीमोदी एतत् वक्तव्यं सबलं प्रत्यपादयत् यत् अनुशासन-प्रेरणे एव अवश्यक्यौ स्तः । सः प्रोदीरितवान् यत् अनुशासनं विना, एकाकी प्रेरणा न प्रभावात्मिकी । प्रधानमन्त्री पुनः अकथयत् यत् अनुशासनं दिग्दर्शनङ्करोति अपरत्र प्रेरणा यात्रां सुदृढां करोति ।

किम् आर्टिफिशियल-इंटेलिजेंस्-टेक्नोलॉजी इत्यनाभ्यां भीतिः समुत्पद्यते ? अथवा छात्राः स्वकीये आजीविकानिर्धारणे टेक्नोलॉजी इत्यस्य प्रयोगः कथं कर्तुं शक्नुवन्ति ? इति प्रश्नस्य प्रत्युत्तरं प्रयच्छन् प्रधानमन्त्री अकथयत् यत् टेक्नोलॉजी इत्यस्मात् भीत्याः आवश्यकता नास्ति अपितु छात्राः सुनिश्चयेयुः यत् ते टेक्नोलॉजी इत्यस्य स्वबुद्ध्या उपयोगं कुर्युः , अपि च तस्योपरि निर्भराः न भवेयुः ।

ध्यानास्पदं वर्तते यत् 'परीक्षा पे चर्चा' इति कार्यक्रमस्य उद्देश्यं परीक्षायाः अवसादं विरुध्य सम्वादः करणीयः अस्ति अपि च परीक्षा उत्सवरूपेण जीवनस्य अभिन्नाङ्गरूपेण च स्वीकरणीया अस्ति ।

------------------------------------------------

## प्रधामन्त्री-सेशेल्स्

प्रधानमन्त्री नरेन्द्रमोदी अद्य सेशेल्स-देशस्य कृते पञ्च-सप्तत्यधिक-एकशतम्-मिलियन-डॉलर-मितस्य विशेष-आर्थिक-साहाय्य-राशेः घोषणाम् अकरोत्। नवदिल्ल्यां सेशेल्स-देशस्य राष्ट्रपतिना डा. पैट्रिक हर्मिनी इत्यनेन सह संयुक्त-वार्ताहर-समेलनं सम्बोधयन् श्रीमोदी अवदत् यत् एतानि देयमूल्यानि सामाजिक-आवासं, ई-मोबिलिटी, व्यावसायिक-प्रशिक्षणं, स्वास्थ्यं, रक्षां, समुद्रीय-सुरक्षां च समर्थयिष्यन्ति।

स्वास्थ्यं, ऋतुविज्ञानं, इलेक्ट्रानिक्स् तथा सूचनाप्रौद्योगिकी, सुशासनेत्यादिषु विविधक्षेत्रेषु भारत-सेशेल्स-देशयोः मध्ये सप्तसु सहमति-पत्रेषु अपि हस्ताक्षराणि जातानि। एतासु सन्धिषु भारत-ऋतु-विज्ञान-विभागस्य सेशेल्स-ऋतु-विज्ञान-प्राधिकरणस्य च मध्ये वैज्ञानिकं तान्त्रिकं च सहयोगम् अन्तर्भवति। अस्मिन् अवसरे श्रीमोदी अवदत् यत् भारत-सेशेल्स-देशौ न केवलं भौगोलिक-दृष्ट्या अपितु इतिहासेन, विश्वासेन, भविष्यस्य सहभागितायाः दृष्ट्या च सम्बद्धौ स्तः।

------------------------------------------------

## रिजेजु-लोकसभा

केन्द्रीय-संसदीय-कार्यमन्त्री किरेन-रिजिजुः आरोपितवान् यत् लोकसभायाः कार्याचरणं काङ्ग्रेस-दलेन बाधितम्। नवदिल्ल्यां प्रसारमाध्यमैः सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत् काङ्ग्रेस-सदस्यानां अशोभनीय-व्यवहारकारणेन राष्ट्रपतेः अभिभाषणस्य धन्यवाद-प्रस्तावस्य विषये चर्चा नाभवत्, लोकसभाध्यक्षः ओमबिरला अपि विपक्षस्य आचरणस्य विषये चिन्तां प्रकटितवान्।

-----------------------------------------------

<u>अमितशाह-नक्सलवादिनः</u>

केन्द्रीय-गृह-मन्त्री अमितशाहः, अवशिष्टान् सक्रियान् नक्सल-जनान्, शस्त्राणि समर्पयित्वा, आत्मसमर्पणं कृत्वा, समाजस्य मुख्यधारायां आगन्तुं प्रार्थयत्। सः अवदत् यत् सर्वकारः पूर्णमर्यादया तेषां पुनर्वसनं सुनिश्चितं करिष्यति। अद्य छत्तीसगढस्य बस्तरस्य विभागीय-मुख्यालये जगदलपुरे बस्तरपण्डुम-महोत्सवस्य समापनसमारोहं सम्बोधयन् केन्द्रीय-गृहमन्त्र ी उक्तवान् यत् ये नक्सलवादिनः सशस्त्र-सङ्घर्षं निरन्तरं कुर्वन्तः सन्ति ते न त्याज्याः भविष्यन्ति, शस्त्राणां उत्तरं शस्त्रेण एव प्रदीयते। सः अवदत् यत् सर्वकारस्य सङ्घर्षः आदिवासि-समुदायानां सुरक्षायै अस्ति।

-----------------------------------------------

<u>लोकसभा-स्थगनम्</u>

विपक्षस्य कोलाहलकारणात् लोकसभायाः कार्यम् एकदिवसाय स्थगितम्। द्वितीय-स्थगनस्य अनन्तरं अपराह्णे द्विवादने यदा सभा पुनः समागता तदा पीठासीन-अधिकारी षड्विंशत्यधिक द्विसहस्र-सप्तविंशत्यधिक द्विसहस्रतम वर्षयोः केन्द्रीय-आयव्यय-सङ्कल्पनापत्रस्य विषये चर्चां कर्तुं प्रायतत, तथा काङ्ग्रेस्-सदस्यं शशिथरूरवर्यं वक्तुं आह्वयत्। परञ्च, श्रीथरूरः विपक्षस्य नेता राहुलगान्धिनः कृते चर्चायाः प्राक् अन्यविषयेषु वक्तुं अनुमतिं दातुं अध्यक्षं प्रार्थयत्। पीठासीन-अधिकारिणा सन्ध्या रे इत्यनया उक्तं यत्, तया विपक्षनेतृभ्यः किमपि सूचना न प्राप्ता अस्ति, यदि सा आयव्ययकस्य विषये वक्तुं इच्छति तर्हि सः वक्तुं शक्नोति। अध्यक्षेन काङ्ग्रेस्-सदस्येभ्यः चर्चायाः अनुमतिं दातुं प्रार्थितम्। अध्यक्षस्य पुनः पुनः प्रार्थनायाः अनन्तरं अपि केन्द्रीय-आयव्ययक पत्रस्य विषये चर्चा नाभवत्। कोलाहलस्य मध्ये, पीठासीन-अधिकारिणा श्वः प्रातः एकादशवादन पर्यन्तं सदनं स्थगितम्। ततः पूर्वं, दिने लोकसभायां अध्यक्षेण ओम बिरला-वर्येण भारतीय-अण्डर्-19 क्रिकेट्-दलं षड्विंशत्यधिक द्विसहस्रतम वर्षस्य अण्डर-19 विश्वकप

स्पर्धा विजयाय वर्धापितम्। राज्यसभायाम् अस्य वर्षस्य केन्द्रीय-आयव्यय-संकल्पना-पत्रे चर्चा समारब्धा। काङ्ग्रेस-दलस्य सांसदेन पी. चिदम्बरम् इत्यनेन चर्चा समारब्धा आरम्भः कृतः।

-----------------------------------------------

## नौका-जलमग्ना

इंटरनेशनल-ऑर्गनाइजेशन -फॉर-माइग्रेशन इत्यनया संस्थया अद्य प्रोदीरितं यत् लीबियायाः तटसमीपं नौकायाः जलमग्नेन जाते दुरापन्ने पञ्चपञ्चाशत् संख्याकेषु नौकायात्रिषु दौ बालकौ समेत्य त्रिपञ्चाशत्-प्रवासिनः मारिताः सन्ति इत्याशङ्का वर्तते । IOM इत्यनेन प्रोक्तं यत् नौका एषा ज़ुवारा-नगरस्य उत्तरक्षेत्रे जलमग्ना जाता अपि च लीबियाधिकारिभिः प्रचालिते सहायोद्धारकार्ये केवलं नाइजीरियामूलस्य द्वे महिले एव सुरक्षिते ।

-----------------------------------------------

## क्रीडास्पर्धा

लक्ष्यभेदन-प्रतियोगितायां, ईशा-सिंहः, मनु-भाकरः, रिदम-सांगवानः च एशियन राइफल/पिस्टल-चैंपियनशिप् इत्यस्यां स्पर्धायां महिलानां पञ्चविंशति-मीटरमितस्य पिस्टल-टीम-इवेंट इत्यस्यस्मिन् स्वर्णपदकं विजितवत्यः ।

।। इति वार्ता: ।।